"नारिकेलं सतोयञ्च लवणेन सुपूरितम् ।
मृदावबेष्टितं शुष्कं पक्कं गोमयवह्निना ॥
पिप्पल्या भक्षितं हन्ति शूलं हि परिणा-
मजम् ।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम् ॥"
इति नारिकेलक्षारः ॥ * ॥
अथान्नद्रवस्य चिकित्सा ।
"अन्नद्रवाख्ये शूले तु न तावत् स्वास्थ्यमश्नुते
यावत् कटुकपीतान्नमन्नं न छर्दयेद्द्रवम् ॥
जातमात्रे जरत्पित्ते शूलमाशु विनाशयेत् ।
पित्तार्त्ते वमनं कृत्वा कफार्त्तञ्च विरेचनम् ॥
अन्नद्रवे च तत् कार्य्यं जरत्पित्ते यदीरितम् ।
जरत्पित्तेऽपि तत् पथ्यं प्रोक्तमन्नद्रवे तु यत् ॥
आमपक्वाशये शुद्धे गच्छेदन्नद्रवः शमम् ।
माषेण्डरीं सलवणां सुस्विन्नां तैलपाचिताम् ॥
माहिषीं सर्पिषा खादेदन्नद्रवनिपीड़ितः ।
धात्रीफलभवं चूर्णमयश्चूर्णसमन्वितम् ।
यष्टीचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण तद्द्रवे ।
श्यामाकतण्डुलैः सिद्धं सिद्धं कोद्रवतण्डुलैः ॥
प्रियङ्गुतण्डुलैः सिद्धं पायसं ससितं हितम् ॥"
प्रियङ्गुः कङ्गुविशेषः ।
"गौड़िकं शौरणं कन्दं कुष्माण्डमपि भक्षयेत् ।
कलाययवशक्तून् वा शक्तून् वा लाजसंयुतान् ॥"
गौड़िकं गुड़ेन संस्कृतं पक्वान्नम् ॥ * ॥
"कुलत्थशक्तूनथवा दध्नाप्याद्दधिकं तथा ॥
चणकानामथो शक्तून् कोद्रवस्यौदनं तथा ॥"
दधिकं दध्ना संस्कृतं भक्तम् । महेरि इति
लोके ॥ * ॥
"गोधूममण्डकं तत्र सर्पिषा गुड़संयुतम् ॥
ससितं शीतदुग्धेन मृदितं क्वथितं हितम् ॥
अन्नद्रवो दुश्चिकित्स्यो दुर्व्विज्ञेयो महागदः ।
तस्मात्तस्य प्रशमने परं यत्नं समाचरेत् ॥
अन्नद्रवे जरत्पित्ते वह्निर्मन्दो भवेद्यतः ।
तस्मादन्नानपानानि मात्राहीनानि कारयेत् ॥
कलाययवगोधूमाः श्यामाकाः कोरदूषकाः ।
राजमाषाश्च माषाश्च कुलत्थाः कङ्गुशालयः ॥
दधिमस्तुरसं क्षीरं सर्पिर्गव्यं समाहिषम् ।
वास्तुकं कारवल्ली च कर्क्कोटकफलानि च ॥
वर्हिणो हरिणा मत्स्या रोहिताद्याः कपि-
ञ्जलाः ।
एतस्मिन्नामये शस्ता मता सुनिचिकित्सकैः ॥"
दधिमस्तुरसं दध्ना युतः कृतो रसो यस्य तत् ।
क्षीरं दधियुक्तं क्षीरमित्यर्थः ॥ * ॥
"गुड़ामलकपथ्यानां चूर्णं प्रत्येकशः पलम् ।
त्रिपलं लोहकिट्टस्य तत् सर्व्वं मधुसर्पिषा ॥
समालोड्य समश्नीयादक्षमात्रं प्रमाणतः ।
आदिमध्यावसानेषु भोजनस्य निहन्ति तत् ॥
अन्नद्रवं जरत्पित्तमम्लपित्तं सुदारुणम् ।
परिणामसमुत्थञ्च शूलं संवत्सरोत्थितम् ॥"
इति गुड़मण्डूरम् ॥ * ॥
"व्यायामं मैथुनं मद्यं लवणं कटुकं रसम् ।
वेगरोधं शुचं क्रोधं विदलं शूलवान् त्यजेत् ॥"
इति शूलामपरिणामशूलान्नद्रवजरत्पित्ताधि-
कारः । इति भावप्रकाशः ॥ * ॥ अपि च ।
"अर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनैः ।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति ॥*॥
साञ्जनञ्च घृतं क्षौद्रं लवणं ताम्रभाजने ।
घृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम् ॥"
साञ्जनञ्च इत्यत्र ताम्बूलञ्च इति वा पाठः ॥
"चूर्णमामलकस्यैव पीतं शूलहरं परम् ॥"
इति गारुड़े १८३।१८५।१८४ अध्यायाः ॥
किञ्च ।
"सामुद्रं सैन्धवं क्षारो राजिका लवणं विड़म् ।
कटु लोहरजः किट्टं त्रिवृत् शूरणकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
एतत्राग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णे जीर्णे च भुञ्जीत माषादिघृतभोजनम् ।
नाभिशूलं मूत्रशूलं गुल्मप्लीहभवञ्च यत् ॥
सर्व्वं शूलहरं चूर्णं जठरानलदीपनम् ।
परिणामसमुत्थस्य शूलस्य च हितं परम् ॥"
इति गारुड़े १९८ अध्यायः ॥
तस्य उपपापजत्वं यथा,—
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः ।
रक्तार्व्वुदविसर्पाद्या उपपापोद्भवा गदाः ॥"
इति शातातपीयकर्म्मविपाकः ॥
शूलकः, पुं, ( शूल इव दुर्व्विनीतत्वात् । कन् । )
दुर्वृत्तघोटकः । इति हलायुधः ॥ अत्र शूकल
इत्यपि पाठो दृश्यते । यथा,—
"विनीतस्तु साधुवाहो दुर्व्विनीतस्तु शूलकः ।"
इति हेमचन्द्रः ॥
शूलग्रन्थिः, स्त्री, मालादूर्व्वा । इति राजनिर्घण्टः ॥
शूलघातनं, क्ली, ( शूलं तद्रोगं घातयतीति ।
हन + णिच् + ल्युः । ) मण्डूरम् । इति शब्द-
चन्द्रिका ॥
शूलघ्नः, पुं, (शूलं हन्तीति । हन + टक् ।) तुम्बुरु-
वृक्षः । इति रत्नमाला ॥ शूलघातके, त्रि, ॥
( यथा, सुश्रुते । १ । ४५ ।
"सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षि-
शिरसां शूलघ्नः इति ॥")
शूलद्विट्, [ष्] पुं, (शूलस्य द्विट् शत्रुः ।) हिङ्गुः ।
इति रत्नमाला ॥
शूलधन्वा, [न्] पुं, ( शूलो धनुर्यस्य । ) शिवः ।
इति शब्दरत्नावली ॥
शूलधरः, पुं, (शूलस्य धरः ।) शिवः । इति शब्द-
रत्नावली ॥
शूलधरा, स्त्री, ( शूलस्य धरा । ) दुर्गा । इति
शब्दरत्नावली ॥
शूलधारिणी, स्त्री, (शूलं धरति या । धृ + णिनिः ।)
दुर्गा । यथा,—
"सती साध्वी भवप्रीता भवानी भवमोचनी ।
आर्य्या दुर्गा जया चाद्या त्रिनेत्रा शूल-
धारिणी ॥"
इति तन्त्रसारधृततच्छतनामस्तोत्रम् ॥
शूलधृक्, [ज्] स्त्री, ( शूलं धर्त्तीति । धृञ् +
क्विप् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ महादेवे,
पुं ॥ ( शूलभृत्-इत्येव क्वचित् पाठः ॥ )
शूलनाशनं, क्ली, (शूलं नाशयतीति । नश + णिच्
+ ल्युः ।) सौवर्च्चलवणम् । इति हेमचन्द्रः ॥
शूलपर्णी, स्त्री, (शूलवत् पत्रमस्याः । ङीष् ।)
शूलीतृणम् । इति राजनिर्घण्टः ॥
शूलशत्रुः, पुं, (शूलस्य शत्रुः ।) एरण्डवृक्षः । इति
शब्दचन्द्रिका ॥
शूलहन्त्री, स्त्री, ( शूलं हन्तीति । हन + तृच् ।
ङीप् ।) यवानी । इति राजनिर्घण्टः ॥
शूलहृत्, पुं, ( शूलं हरतीति । हृ + क्विप् । )
हिङ्गुः । इति त्रिकाण्डशेषः ॥
शूला, स्त्री, दुष्टवधार्थकीलकः । वेश्या । इति
विश्वः ॥
शूलाकृतं, त्रि, ( शूलेन कृतम् । "शूलात् पाके ।"
५ । ४ । ६५ । इति डाच् ।) लौहादिशलाकया
विद्धं पक्वमांसम् । कावाव् इति पारस्यभाषा ।
तत्पर्य्यायः । भटित्रम् २ शूल्यम् ३ । इत्यमरः ॥
वासितारम् ४ । इति जटाधरः ॥ शूलिकम् ५
इति शब्दचन्द्रिका ॥ अस्य गुणाः शूल्यशब्दे
द्रष्टव्याः ॥
शूलिकं, क्ली, (शूलः निमित्तत्वेनास्त्यस्येति । शूल
+ ठन् । ) शूलाकृतम् । इति शब्दचन्द्रिका ॥
शूलिकः, पुं, शशकः । इति हेमचन्द्रः ॥ (शूलः
अस्यास्तीति । ठन् । ) शूलयुक्ते, त्रि, ॥
शूलिनः, पुं, भाण्डीरवृक्षः । इति शब्दमाला ॥
शूलिनी, स्त्री, (शूलं अस्या अस्तीति । शूल +
इनि । ङीप् । ) दुर्गा । यथा,—
"खड्गिनी शूलिनी घोरा गदिनी चक्रिणी
तथा ॥
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥"
इति देवीमाहात्म्यम् ॥
शूली, [न्] पुं, शूलमस्यास्तीति । शूल + इनिः ।
शिवः इत्यमरः ॥ ( यथा, महाभारते । ३ ।
८४ । ८४ ।
"ततो गच्छवटं गच्छेत् स्थानं देवस्य शूलिनः ॥"
शशः । इति भावप्रकाशः ॥ शूलास्त्रधारके
शूलरोगयुक्ते च त्रि । यथा,—
"वर्जयेद्विदलं शूली कुष्ठी मांसं क्षयी स्त्रियम् ।"
इति वैद्यकम् ॥
तस्य कारणं प्रायश्चित्तञ्च यथा,—
"शूली परोपतापेन जायते तत्प्रमार्ज्जकः ।
सोऽन्नदानं प्रकुर्व्वीत तथा रुद्रं जपेन्नरः ॥"
इति शातातपीयकर्म्मविपाकः ॥
शूली, स्त्री, तृणभेदः । तत्पर्य्यायः । शूलपर्णी २
शशाख्या ३ क्षुद्रमूलिका ४ जलाश्रया ५ मधु-
लता ६ पिच्छिला ७ महिषीप्रिया ८ । अस्या
गुणाः । पिच्छिलत्वम् । कोष्णत्वम् । गुरुत्वम् ।
गौल्यत्वम् । बलप्रदत्वम् । पित्तदाहहरत्वम् ।
रुच्यत्वम् । दुग्धवृद्धिकारित्वञ्च । इति राज-
निर्घण्टः ॥